# विभक्तिः

२२ – ११.०६.२०१६

व्योम-संस्कृत-पाठशाला
www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम् - षष्ठीविभक्तिः

- षष्ठीविभक्तिः – द्वयोः पदार्थयोः सम्बन्धः
- सम्बन्धः बहुविधः
  - मम पुस्तकम्,
  - मम हस्तः,
  - मम पुत्री,
  - मम माता,
  - मम देशः

# षष्ठीविभक्तिरूपाणि

| | | |
|---|---|---|
| बालकस्य | बालकयोः | बालकानाम् |
| बालिकायाः | बालिकयोः | बालिकानाम् |
| नार्याः | नार्योः | नारीणाम् |
| मित्रस्य | मित्रयोः | मित्राणाम् |

# कृदन्ताः

- कृ – कृतवान्, कृतम्, कर्तुम्, कृत्वा, कुर्वन्, करणम्, कृतिः
- पठ् – पठितवान्, पठितम्, पठितुम्, पठित्वा, पठन्, पठनम्, पाठः
- वच् – उक्तवान्, उक्तम्, वक्तुम्, उक्त्वा, वचनम्, उक्तिः

# अभ्यासः – १

# करोति - करणम्

| | | | |
|---|---|---|---|
| पठति | श्रृणोति | उपविशति | पचति |
| लिखति | गायति | प्रविशति | पश्यति |
| गच्छति | चिन्तयति | तिष्ठति | पिबति |
| खादति | गणयति | प्रतिष्ठते | यच्छति |
| क्रीडति | कथयति | आगच्छति | स्वीकरोति |
| भुङ्क्ते | नृत्यति | वदति | धावति |

# अभ्यासः - २

| करोति - कृतिः | करोति - कर्ता | पचति - पाचकः | |
|---|---|---|---|
| सृजति | गच्छति | पठति | वादयति |
| भजति | शृणोति | अध्यापयति | पृच्छति |
| वक्ति | वक्ति | नृत्यति | हरति |
| गच्छति | ददाति | लिखति | कर्षति |
| प्राप्नोति | पचति | गायति | बोधयति |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# कृदन्तयोगे षष्ठी - कर्तरि

- कालिदासस्य लेखनं को वा न इच्छति?
- रामस्य गमनम् दुःखकरम् ।
- श्वः अमेरिकां प्रति मित्रस्य प्रस्थानं भवति।
- भगवतः सृष्टिः अद्भुता।

# अभ्यासः - ३

- महाभारतं (व्यासः) कृतिः ।
- (उपाध्यायः) वचनं छात्राः पालयन्ति ।
- (गौरी) गानं बहु मधुरम् ।
- (रमा) नृत्यम् अहम् इच्छामि ।
- (मित्राणि) गमनेन वयं दुःखिताः ।
- (लवकुशौ) क्रीडा सीताम् आनन्दयति ।

# अभ्यासः - ३

- (भासः) उक्तिः हासं जनयति ।
- (अम्बा) पाकः रुचिकरः ।
- (हरिण्यः) धावनं मनोहरं भवति ।
- (राजेन्द्रः) लेखः मया न पठितः ।
- (द्रौपदी) हासेन दुर्योधनस्य कोपः उत्पन्नः ।
- आज्ञा (गुरवः) ह्यविचारणीया ।

# कृदन्तयोगे षष्ठी - कर्मणि

- वयं कृष्णस्य पूजनं कुर्मः ।
- वाल्मीकिः रामायणस्य कर्ता ।
- वीणायाः वादनेन मनः प्रफुल्लं भवति।
- उपाध्यायः काव्यस्य बोधनं करोति ।

# अभ्यासः - ४

- (रघुवंशम्) कर्ता कालिदासः ।
- (लोकः) सृष्टिः भगवता कृता ।
- महाराजः दरिद्रेभ्यः (वस्त्राणि) दानं करोति ।
- (वेदाः) श्रवणं पुण्यप्रदम् ।
- कृषिकः (क्षेत्रम्) कर्षणं करोति ।
- (ताराः) गणनं न शक्यम् ।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ४

- (कथा) कथनम् आसक्तिकरम् आसीत् ।
- (लेखनी) क्रयणं कर्तुम् अहम् आपणं गच्छामि ।
- सः (उत्तमश्लोकाः) रचनं करोति ।
- सर्वैः (धर्मः) पालनं कर्तव्यम् ।
- शुनकः (गृहम्) रक्षणं करोति ।
- (फलानि) खादनं स्वास्थ्यं वर्धयति ।